जम्बूद्वीपशब्दे २०४४पृ० दर्शिताः । भारतवर्षस्थाः समुद्रगाश्च "नदीं पिबन्ति विपुलामित्यादिना "यमुनाञ्च महानदीमित्यन्तेन" भा०भी०उक्ताः २०४६ पृ० दर्शिताः । क्षुद्रनदीनामपि महानद्यामिलितानां समुद्रगामित्वं यथोक्तं माघे "याम्बूयाम्भोधिमभ्येति महानद्या नगापगा" । [त्रिका० ।

**समुद्रगृह** न० समुद्र इव प्रचुरजलं गृहम् । जलयन्त्रगेहे

**समुद्रचुलुक** पु० समुद्रः चुलुकः गण्डूषजलमितजलमिव अनायासेन पीतत्वाद्यस्य । अगस्त्ये मुनौ त्रिका० ।

**समुद्रनवनीत** न० समुद्रस्य नवनीतमिव । समुद्रमन्थनोद्भूतसारांशे १अमृते २चन्द्रे च मेदि० ।

**समुद्रफल** न० ओषधिभेदे "समुद्रनाम प्रथमं पश्चात् फलमुदीरयेत् । समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः । फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि । त्रिदोषदावानलदोषहारि कफामयभ्रान्तिविरोधकारि" राजनि० तद्गुणा उक्ताः ।

**समुद्रफेन** पु० ६त० । समुद्रस्य फेने अमरः "समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः । कषायो विषपित्तघ्नः कर्णरुककफहृल्लघुः" भावप्र० तद्गुणा उक्ताः ।

**समुद्रमेखला** स्त्री समुद्रः मेखलेव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । समुद्ररसनादयोऽप्यत्र ।

**समुद्रयान** न० यायतेऽनेन या-करणे ल्युट् ६त० । पोते समुद्रतरणसाधने नौकाभेदे वराहपु० ।

**समुद्रयात्रा** स्त्री ६त० । समुद्रस्य तीर्थत्वेन गमने । कलौ तन्निषेधः कलिशब्दे १८०४ पृ० दृश्यम् ।

**समुद्ररमण** स्त्री समुद्रः रमण इव वेष्टकत्वात् यस्याः । पृथिव्यां हला० ।

**समुद्रलवण** न० समुद्रजलजातं लवणम् । (करकच)सामुद्रे लवणे राजनि० । "सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् । सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु । नात्युष्णं दीपनं भेदि अक्षीवमविदाहि च । श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम्" भावप्र० ।

**समुद्रवह्नि** पु० ६त० । समुद्रस्थे अग्नौ वाडवानले हला० ।

**समुद्रवेला** स्त्री ६त० । समुद्रस्य कूले ।

**समुद्रसुभगा** स्त्री ६त० । गङ्गायां राजनि० ।

**समुद्रान्त** न० समुद्रस्यान्तः पर्य्यन्तदेशः उत्पत्तिस्थानत्वेनात्यस्य अच् समुद्रः अन्तो यस्य वा । १जातीफले शब्दच० २दुरालभायां स्त्री अमरः । ३कार्पास्यां ४पृक्कायां मेदि० ५यवासे स्त्री राजनि० । ६त० । ६समुद्रपर्य्यन्ते त्रि० ।

**समुद्राम्बरा** स्त्री समुद्रःअम्बरमिव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । सागराम्बरादयोऽप्यत्र ।

**समुद्रार** पु० समुद्रमृच्छति ऋ-कर्त्तरि करणे वा अण् । १कुम्भीरे २सेतुबन्धे ३तिमिङ्गिलमत्स्ये मेदि० । [पटार्थे ।

**समुद्रि(द्री)य** त्रि० समुद्र+भवार्थे घ छ वा । समुद्रभवे

**समुद्वह** त्रि० सम्+उद्+वह-अच् । श्रेष्ठे सम्यगुद्वहनकर्त्तरि च । [अमरः ।

**समुन्दन** न० सम्+उन्द-ल्युट् । सम्यगार्द्रीभावे (भिजा)

**समुन्न** न०सम्+उन्द-क्त । १क्लिन्ने २आर्द्रे अमरः । [पर्य्यायः

**समुन्नत** त्रि० सम्+उद्+नम-क्त । १अत्युच्चे २जन्मभेदे पु०

**समुन्नति** त्रि० सम्+उद्+नम-क्तिन् । १उच्चतायाम् "प्रायः पयोधरसमुन्नतिरत्र हेतुः" उत्युद्भटः । २उत्सेधे स्त्रीनतायां जटा० ।

**समुन्नद्ध** त्रि० सम्+उद्+नह-क्त । १गर्विते २पण्डितम्मन्ये अमरः । ३प्रभौ अजयः । ४समुद्धृते मेदि० ५उत्क्षिप्य बद्धे हेमच० । ६समुद्धूते च । भावे क्त । ७उत्तोल्यबन्धने न० । [२उत्क्षेपणे ४समुद्धावने च ।

**समुन्नय** पु० सम्+उद्+नी-अच् । १ऊर्द्ध्वनयने २सम्यक्प्राप्तौ

**समुपचित** त्रि० सम्यक् उपचितम् उप+चि-क्त । १पुञ्जीकृते २संवर्द्धिते च । [रामाश्रमः ।

**समुपजोषम्** अव्य० सम्+उप+जुष-अम् । अत्यन्तानन्दे

**समुपेयिवस्** त्रि० सम्+उप+इण-क्वसु । समीपंगते ।

**समुपोढ** त्रि० सम्+उप+वह-क्त । १सङ्क्ते २सञ्जाते च ।

**समुल्लेख** पु० सम्+उद्+लिख-घञ् । पादादिना भूम्यादेः खनने ।

**समूढ़** त्रि० सम्+ऊह+वह-वा क्त । १राशीकृते २अनपप्लुते "समूढ़मस्य पांसुरे" इति ऋग्वेदः । ३भुग्ने ४सद्योजाते मेदि० ५दमिते ६कृतविवाहे भरतः ७शोधिते जटा० । सह मूढ़ेन । ८मूढ़सहिते त्रि० ।

**समूरु** पु०सक्तौ सन्धिहीनत्वात् ऊरू यस्य । मृगभेदे अमरः पृषो० । समूर तत्रार्थे पुंस्त्री० हेमच० स्त्रियां ङीष् ।

**समूल** त्रि० सह मूलेन । मूलसहिते "समूले उपपदे कषादिभ्यः णमुल् तत्प्रकृतिधातोरनुप्रयोगश्च "समूलकाषं कषः" "समूलघातं न्यवधीत्" इति च भट्टिः ।

**समूह** पु० सम्+ऊह-घञ् । १समुदये अमरः । समूहत्वञ्च अपेक्षाबुद्धिविषयविषयत्वं त्रित्वादिपर्य्याप्तसंख्याविशेषो वा । २सम्यग् ऊहे तर्के च ।